PAGE(S) MISSING
NOT AVAILABLE

Folio No:-
1 To 9





Digitized with financial assistance from the
Government of Maharashtra
on 11 June, 2017

वाक्यत्वात्। प्रवृत्तिसंवादादेर्ज्ञानोत्तरकालीनत्वात्। प्रमादिजन्यविलक्षणत्वेनशब्दस्याज्ञानात्। ज्ञानेवायादृशो
लिंगत्वंतस्यैवप्रत्यापकत्वमध्यभिचारात्। वेदेपिवाक्यार्थमविज्ञायतद्यथार्थवतीतिपरत्वंन्यायेनापिज्ञातुमेश
क्यंविषयनिरूप्यत्वात्यतीतेःलोकेचतात्पर्यनिरूपणार्थमशब्दवाक्यार्थवतीतिःप्रथमंत्वयापिस्वीकारात्। अ
थावक्तुज्ञानानुमानापेक्षानास्त्यात्। नचलोकवन्मानांतरान्नदवगमः। वेदार्थस्यतद्विषयत्वात्। वेदस्यच
प्रथमंमूलकत्वात्। नचन्यायसिद्धेवेदार्थेमानांतरात्तात्पर्यंयुक्तं। वेदस्यानुवादकतापत्तेः। शब्दस्यप्रमाणत्वा
पत्तेर्वा। अज्ञातेवाक्यार्थेतर्कसंशययोरयोगात्। अयंपदार्थोपरपदार्थंसंसृष्टोनवेतिसंशयेतकेचैक

कोटौसंसर्गानुपस्थितश्चतिचेत्तानाश्रनिश्चितेतात्पर्यानिश्चयात्तातयोरदृष्टातासंसर्गविषयत्वेनासदर्थविषयत्वेनवा
वाक्यार्थविषयत्वाच्च। अथयथालोकेपितापुत्रमेवोपस्थितिरितिकिंवक्तुज्ञानानुमानेनावस्तुतस्त्वस्यदृश्यंयथार्थतात्प
र्यकत्वंज्ञातंशब्दस्योत्पादकंतदालोकवेदयोस्साहश्यादस्मारितत्वेनपदार्थसंसर्गानुमितिसंभवान्नशब्दःप्रमाणं
स्यात्। अपिचानुवाक्यस्यहेयविशिष्टज्ञानान्यतरजन्यत्वेनुमितेपरिशेषादपूर्वजन्यत्वनिश्चयश्चायंवेदस्तुल्य
सामग्रीकंवाक्यंपिशुनेतितत्तदर्थनिश्चयादेवन्नार्थंपिशाचाद्यर्थं। अनुमितानुमानस्यचाप्रसिद्ध्यादिविलं
बितत्वात्। एतेनाबाधितार्थपरत्वंलोकेवेदेचप्रमापकंलोकेचदाक्यार्थबाधितोपिदृष्टश्रुतिश्चोतुःप्रमाणवत्

तृ३

रंविनानबाधाभावनिश्चयुःसवक्तविश्रोतरिंद्रियेणक्तविवक्तुराप्तत्वात्तमानेनवेदेनुत्थायातन्निश्चयःतदर्थस्य
प्रमाणांतराविषयत्वात्तेनवशंकेतिसामर्थ्यसिद्धंतिनिरस्तं।अथमंत्रमाद्यमावस्थाप्तत्वंवानिश्चेतुशक्यत्व
त्तावेदस्योतुबादकतापत्तेश्चातस्मात्प्रमाद्यजाथत्वमाशंक्यत्वमबाधितार्थत्वंयथार्थतात्पर्यकत्वंनिरस्य
मिवारशंकत्वमथवाद्यमिवारिथाद्दृष्टंयत्प्रमोत्पादकंतत्त्वरूपंमत्रज्ञानं।अथथातादृशाद्यवाक्यार्थाद्य
मिवारितयातादृशपदस्मारितत्वात्तलिंगादेवसंसर्गसिद्धिःस्यादितिजितंवैशेषिकैः।अथद्यवहारोतुमितद्य
वहर्तृकार्यान्वितज्ञानउपस्थितत्वेनपदानांहेतुत्वंयहादन्वितामिधेयकत्वंदृष्टंतेनतुलिंगज्ञानस्यतदानीं

शब्दस्यलिंगत्वेनतूपस्थितेरितिचेत्तानलिंगभावेनेवशब्दान्वयबोधोपपत्तेर्नाकांक्षादिमच्छब्दत्वेनकारणतागौ
रवात्।शब्दस्यलिंगत्वंसंभवदपिबालेननज्ञातमितिचेत्।सायेबालस्यदोषोनतुनश्यतिवक्ष्यते।किंचैवमपिलौ
कवैदेथतुबादकतेवस्यात्।एतेनवाक्यार्थतात्पर्यग्राहकातुमानाज्ज्ञात्वयोवच्छेदकतयातदपजीविनो
तुमानात्त्वातेनैवबाक्यार्थसिद्धेर्नशब्दःप्रमाणमितिवैशेषिकमतमपास्तं।यथार्थतात्पर्यग्रहस्यवा
क्यार्थबोधहेतुत्वात्।यत्तुज्ञायमानकरणइत्यादितन्न।यथार्थतात्पर्यकत्वादेःप्रथमंज्ञातुमशक्य
त्वेनातुमानस्यबाधितत्वात्।याश्यसिद्धेश्चानहियाप्तिःशक्तिश्चकारणंकिंतुधीः।अतीतेऽतुमितिदर्श

नात्। अपशब्दशक्तिभ्रमादवयबोधाच्च नवमेवोपजायतइतिसाध्यं। प्रथमंतदसंभवात्। तस्माद्यदर्थाध्यभिचारित्वेनज्ञातंकरणंतद्यभिचारिवेलक्षण्येज्ञानमुपपुञ्जते। अथयाशब्दाद्याध्यभिचारितयाज्ञात
स्यज्ञापकत्वेलिंगत्वापत्तेर्वज्रलेपायमानत्वात्। स्यादेतत्। अनाप्तोक्तेवाधकेसत्यर्थाभावदर्शनादाप्तोक्ता दि १२
मवाक्यत्वेनसदर्थकंवाबाधितार्थकंवेतिसंशयात्तावन्नाप्तार्थनिश्चयः। नचसंशायकएवनिश्चायकइत्य धिकमपेक्षणीयमितिवेत्। न। अर्थसंशायस्यतद्बाधसंशायस्यवाप्रमाणप्रतिबंधकत्वात्। वक्तितबाधयो
संशयेपत्यक्षानुमानादिनार्थनिश्चयात्। अथयाप्रमाणमात्रोच्छेदः। तत्सर्वमर्थतद्बाधसंशयात्। विना

यर्थवाक्यरचनासंभवत्यतएतत्यायमर्थोनवेतित्यसदर्थकंनवेतज्ज्ञात्यज्ञानंसद्विषयंनवेतिसंशयस्यास्मं
वगमोत्तरकालीनत्वाच्च। तस्मादाप्तोक्तत्वंयमाद्यजन्यत्वमबाधितार्थकत्वंयथार्थवाक्यार्थधीतिपर
त्वंवाज्ञातमनुगतमपिनहेतुः। प्रथमंयद्धीत्वमशक्यत्वात्। किंतुतात्पर्यग्राहकत्वेनाभिमतानांग्राय
जन्यज्ञानप्रकरणादीनामथतत्तात्पर्यग्राहत्वेनानुगतं। तथाचाकांक्षाज्ञानमात्तिनिश्चयस्तद्विपर्ययेसं
येचशब्दज्ञानाभावात्। योग्यताज्ञानमात्रे। ततसंशयेविपर्ययेवमार्थवाक्यार्थज्ञानात्। तथा
विभक्त्यादिसमभिव्याहारःसंसृष्टयोश्चारणंशब्दज्ञानमात्रेकारणानि। नानार्थेश्लिष्टेचानेकार्थीपस्थिता

वपिप्रकरणादिवशादेकमर्थमादायान्वयबोधः।लक्षणापिनतात्पर्यात्तुपपत्त्याकिंत्वन्वयात्तुपपत्त्यैवा।प्र
करणाज्ञोजनप्रयोजनत्वेनावगतप्रवेशानस्यायष्प्रवयात्तुपपत्तेः।अजहत्स्वार्थायांप्रकरणादेस्तुत्रि
तदितरस्यायांतीत्यनेनागमनकर्तृत्वमवगतंतदन्वयानुपपत्तिरस्थविमाचे।पचतीत्यस्यकलायमि १२
त्यस्योक्तेनसमंनार्थप्रत्यायकत्वं।समभिव्याहारमात्रात्तवापितस्यतात्पर्यग्राहकत्वात्।सहोच्चा
रितानांसंहत्यार्थप्रत्यायकत्वस्यशक्तिसिद्धत्वात्।अथेतनानार्थलक्षणायांचनियतोपस्थित्यर्थं
पदार्थतात्पर्ययहापेक्षातेनविनातदभावात्।नदाक्यार्थातदज्ञानेपिप्रकरणादिभिःसंभवपदांतर

गपरेकाकपदस्योपयातकपरमितिप्रतियंतिाअन्यत्रान्वयप्रतियोग्युपस्थितितात्पर्यग्रहंविनेवेतिनतदपेक्षे
ति।वस्तुतस्तितरपदस्येतरपदार्थसंसर्गज्ञानपरत्वंतात्पर्यंतच्चवेदेव्यायादक्ष्यतेलोकेव्यायात्प्रकरणा
देर्वा।अतएवशाब्दबोधेनियतहेतुकत्वंतच्चेतरपदार्थसंसर्गज्ञानंवाक्यार्थज्ञानमेवेतिसामान्याकारेण
तात्पर्यग्रहोहेतुर्नतुविशिष्टातच्चपदार्थयोःसंसर्गस्तमवज्ञानंविनानुपपन्नमितिपदानिसंहत्यजनय
तिाततएवनानार्थेविनिगमनातदनुपपत्तिरेवलक्षणाबीजंातदभावात्तत्पदेननस्तत्कलायान्वय
बोधइतिशाब्दव्यप्रमाणांतरत्वंातस्यचनिराकांक्षादेःसंसर्गज्ञानंजनकत्वादाकांक्षादिकंसहकारीतिा।

थकेयमाकांक्षानतावद्विनाभावः।नीलंसरोजमित्यादावभावात्। विमलंजलेनघ्राः कलङ्ग इत्यत्रजलान्वि
तनघ्राअविनाहृतलक्षणकांक्षतापत्तेश्च।नापिसमभिव्याहृतपदस्मारितपदार्थजिज्ञासा।अजिज्ञासि
तपिवाक्यार्थबोधात्। विश्वजिताय्जेतव्यमित्यत्रापदार्थयोरप्यधिकारिणोध्याहृतत्वप्रत्यवधा
कांक्षितत्वाच्च।तत्रत्रादकल्पनापत्तेपिघटःकर्मत्वमानयनमित्यत्रजिज्ञासितस्यानयनादेराकांक्षा
पत्तेः।अथजिज्ञासांप्रतियोग्यतासा।जिज्ञासाचविशेषाज्ञानेभवति।योग्यतावच्छेदकरूपेणज्ञा
त्रसंसर्गावगमप्रागभावः।विमलंजलंनघ्राः।कलंमहिषइत्यत्रतात्पर्यवशाल्लक्षणाविनाघ्राःकलंसं

DR. BHAU DAJI MEMORIAL

र्गावगमाहत्यागभावसत्वेपिश्रोतरितउच्चारणेनतात्पर्यवशाज्जलान्वितनघ्राःकलंसंसर्गावगमोनेतिन
त्यागभावः।घटःकर्मत्वमानयनमित्यत्रापितथेतिचेत्।नानिराकांक्षतउच्चारणजन्यसंसर्गावगप्राग
भावस्यसिद्धसिद्धिपराहतत्वात्।किंचायत्रैकोविमलंजलमित्यश्रुत्वैवतात्पर्यभ्रमेणपानघ्राःकला
न्वयपरत्वमवैति।अपरस्तमस्तमेवश्रुत्वानघ्राजलान्वयपरत्वमवधारयति।तत्रोभयोरपितउच्चारण
जन्यसंसर्गावगमान्नघ्राइत्यनयाकांक्षयात्।अपिचाप्रागभावाभावस्यकारणांतराभावध्वंसत्वा
नतएवकार्याभावइतिकिमाकांक्षया।एवंचयोग्यतासत्त्वेअपिनहेतुत्वं।अयोग्येअनासत्तेचतउच्चा

ण्डजश्च संसर्गज्ञानाभावेनतत्त्यागभावाभावात्। नचैवं बौधाभावस्याऽभित्यादावपिहेतुत्वं। प्रागभावाभावे
नैवकार्याभावात्। प्रागभावस्यचकार्यमात्रहेतुत्वात्तद्देनासाधारण्यं। उत्थितोत्थापकोज्ञयोरुत्कर्षा
पकर्षनिरूपणं॥ प्रागभावेतदभावात्। अथज्ञाप्यतद्धितरूपयप्रकारकजिज्ञासाऽनुकूलपदार्थोपस्थि
तिजनकत्वेसतिशब्दजनितताात्पर्यविषयावयबोधत्वमाकांक्षा। घटमानयतीत्यत्रघटमित्यस्तेकिमानु
यतिपश्यतिवाआनयतीत्यस्तेकिंघटमस्त्येतिजिज्ञासाभवति। घटःकर्मत्वमानयनक्रतिरितिना भेदे
नान्वयोऽयोग्यत्वात्। घटस्यानयनमितितुनान्वयबोधोभवतिघटश्रुतिपदात्तद्घटस्यसंबंधित्वेनान्व

१५

१५

पस्थितेःगाञ्चशृतिपुरुषेणाजनिताऽन्वयबोधानऽनुपपमाकांक्षतीतिचेत्। तर्हिनामविभक्तिधात्वाख्यातार्थी
नांघटकर्मत्वानयनकृतीनांस्वरूपेणोपस्थितिर्नान्वयप्रकारकजिज्ञासाऽनुकूलेतिनतत्राकांक्षाख्या
त्राघटःकर्मत्वमानयनंकृतिरित्यत्रघटमानयतीत्यत्रेवान्वयबोधःस्यात्। नहितत्रपदार्थस्वरूपाण
मेतत्रैलक्षण्येनोपस्थितिः। नयाणांतुल्यवत्स्मरणेऽप्रथमंयतोगाञ्चशृतिपुरुषेणान्वेतिकिंतुगाञ्चः
न्वेणानतएवार्थेपीतिव्यर्थमजनिताऽन्वयबोधत्वमितिउच्यते। अभिधानापर्यवसानमाकांक्षान्वयेन
विनानस्वार्थान्वयकत्वंतस्यतदपर्यवसानं। नामविभक्तिधात्वाख्यातक्रियाकारकपदानांपरस्परं

नानपरस्परस्यस्वार्थान्वयानुभवजनकत्वंपरमतेनीलोघटोस्तिनीलंघटमानयेत्यादौनास्वार्थानांकारकाणांच
नपरस्परमन्वयबोधः।विशेषणान्वितविभक्त्यर्थानन्वयादितिनविशिष्टवैशिष्ट्येनान्वयःकिंत्वर्थःसमाजः।
अस्माकंतुनीलघटयोरभेदानुभवबलादभेदएवसंसर्गोविशेषणविभक्तिःसाधुत्वार्थाःयद्वासमानविभक्ति
कयोरभेदानुभवबलाद्विशेषणान्वितविभक्तेरभेदार्थकत्वमतोविशेषणविशेष्यभावानुभावकत्वंतत्पदयो १६
नापरस्परंविनाद्वारमित्यन्वयाध्याहारंविनाप्रतियोथलाभान्नस्वार्थान्वयानुभावकत्वं।विश्वजितायजेते
त्यत्रसमभेदैकार्थमितिप्रवर्तकतात्पर्यविषयज्ञानंनाधिकारिणंविनेतिदिकांक्षा।यद्वाकर्तुरिवाधिकारिणो

न२

थाक्षेपादेवलाभेतितरान्वयोनगाद्दकिंत्वानुमानिकःगौणलाक्षणिकयोरनानुभावकत्वपक्षेप्रस्थापितत्याध्याह्
तत्पदेवेतरपदंविनानानुभावकत्वं।घटःकर्मत्वमानयनंक्रतिरित्यादावभेदेबनान्वयबोधःअयोथवात्तत्पदे
श्रुत्यात्पर्यविषयतत्तत्पदार्थस्वरूपज्ञानंचपदांतरंविनैवान्वयतीत्येवयत्नेणतथान्वयतात्पर्येपिक्रि
याकारकभावेननान्वयः।नामविभक्तिधात्वाख्यातक्रियाकारकपदार्थानामर्थाद्यान्वयबोधेतावत्समर्थानि
नतुतत्तदर्थकाणिपदांतराणि।अग्निःकरणत्वमोदनःकर्मतापाकःक्रतिरिष्टसाधनतेतिपदेभ्योग्निनोदनप
देतत्येवान्वयाबोधात्।अग्निकरणकौदनकर्मकपाकविषयकक्रतिरिष्टसाधनमितिवाक्येनपदं।अतए

न३

वधारमित्यत्र पिधेरिपदाध्याहारः क्रियापदार्थत्याथतउपस्थितावपिकारकानन्वयात्। असामर्थ्यतश्चभावात्।
अनासन्नमथासन्नतादशायामाँ नत्वभ्रमेणवान्वयबोधसमर्थमेवावक्तिनाप्रेवतीत्यत्रक्रियाकारकपदयोर
न्वयबोधसामर्थ्यंयथोथताज्ञानंप्रतिबंधकंदाहसमर्थत्वाग्नेर्मणिग्नि। अतएवयोग्यताधमात्प्रतिबंधकाभा
१२ वेततोयत्नान्वयबोधः।नहिस्वभावतोसमर्थमारोपितसामर्थ्यंदहतिपचतिवेति।पक्षतेतत्पदार्थस्वरूपज्ञानंना १२
न्वयश्चमोपि।पुरुषपदंविनापिराज्ञइत्यत्रपुंस्त्वेणसमंस्वार्थोपस्थापकत्वमितिनतदाकांक्षा।यद्वान्वयाणांस्म
रणेअजनितान्वयबोधदशायांपुरुषान्वयतात्पर्याभावान्नान्वयबोधइत्ययेपितथा।नचपुंस्त्वोपस्थितावा

न्नत्वात्तेनैवान्वयबोधइत्यपिवाच्यं।तात्पर्यवशात्कचित्पुरुषेणैवपृथगन्वयबोधात्। अतएवान्वयसमर्थत्वे
सत्यजनितताात्पर्यविषयान्वयबोधत्वमाकांक्षेतिकेचित्।पक्षतिप्रत्ययार्थासन्वयबोधजनितेपिवाक्येक
वाक्यतावच्छिन्नाकारकपदयोरजनितान्वयबोधत्वमाकांक्षानयासुंपदविशेषितत्यपदार्थोपस्थितिर्घटःक
र्मत्वमानयनेक्षतिरित्येवंविधपदजन्यपदार्थोपस्थितिर्वाआसत्तिरन्वयबोधांगमित्यासत्यमाकांक्षेवंविधशा
दान्नान्वयबोधः।त्वयाघटंवर्तयेतिवाक्यादाकांक्षायाहेतुत्वेनावश्यापेक्षणात्।अजनितान्वयबोधान्नान्वयां
तरबोधःतात्पर्याभावादित्याकांक्षायाःकारणत्वमेवनास्ति किंतुस्वजनकोपस्थितेःपरिवायकत्वमिति।न

ह्कायोथता।नतावत्सज्ञातीयेऽवयदर्शनेनयथाकथंचित्सज्ञात्वव्याप्त्याद्यावच्छेदकत्वात्।पदार्थतावच्छेदके
नसज्ञात्वव्याप्यज्ञातःपयःपिबतीत्यादावभावात्।वाक्यार्थत्वव्याप्यत्वाच्च।नापिसम्यमिथ्याहृतपदार्थसं
सर्गव्याप्यधर्मवत्वं।वाक्यार्थत्वव्याऽप्रमेयतापत्तेः।नचवस्तुगत्यासंसर्गव्याप्योयोधर्मस्तत्वंतच्चनज्ञातमुपयु
क्तंतदितिनाऽप्रमेयःसंसर्गइतिवाच्यं।योग्यताप्रमाछाद्यप्रमाऽप्रयोजकत्वात्।अतएवानवधिनिश्चयविरहएवयो
ग्यताच्छब्दप्रमतीहेतुः।तच्चतद्धर्मीभावनिश्चयेतत्प्रकारकशाब्दज्ञानाऽदृष्ट्यादित्यपास्तं।नापिसम्यमिथ्या
हृतपदार्थसंसर्गाभावव्याप्यधर्मरहित्यत्वं।प्रमेयसम्बिधेयमित्यादौसंसर्गाभावस्यप्रसिद्धातदनिरूपणा

त्वा।नहिनिश्चयदशाभावेऽप्रसिद्धेरशाभावेऽप्रसिद्धेरेवास्तीतिवाक्यात्तन्निश्चयेऽपत्तेश्चयज्ञानाऽदृष्ट्याच्चनापिबाध
कप्रमाणाभावः।अथचाप्रबाधकंतदभावव्यायोग्येपिसत्वात्।नापिप्रकृतसंसर्गेबाधकस्याभावः।प्रति
योगिसिद्धिविद्यात्तातत्व।नचाप्रकृतसंसर्गेऽपिसिद्धस्यबाधकप्रमाणस्याभावः।प्रकृतसंसर्गस्याप्र
थमसज्ञानात्।अथोग्येपितत्सत्वाच्चतच्चबाधकमप्रसिद्धमितिचेत्।तर्हिप्रकृतसंसर्गबाधकस्याभावःतच्चा
प्रसिद्धं।अतएवतच्चबाधकस्यानिरूपणं।नापीतरपदार्थसंसर्गाभावस्यप्रमाविषयत्वाभावोपरपदार्थी
केवलान्वयित्वेप्रसिद्धेः।एतेनयच्चासंबंधयाहकंप्रमाणंनास्तितद्योग्यमितिनिरस्तं।नापिबोधनीयसंस

र्गभावप्रमाविरहः।प्रतियोग्यप्रसिद्धेः।बोधनीयसंसर्गस्यपूर्वमप्रतीतत्वात्।योग्यतावन्नस्वरूपमत्व
पपुरुषतश्चोक्तं।अयोग्येतत्तस्यानिरूपणाच्च।अपिच।स्वीयबाधकप्रमाविरहाय्योग्येपिसत्वात्।
बाधकप्रमामात्रविरहस्यज्ञातुमशक्यत्वात्।परप्रमायाअयोग्यत्वात्।नचस्वरूपमत्रैवायंहेतुः।स्वी
यबाधकप्रमाविरहदशायांयोग्यताप्रमेणशाब्दप्रमानुपपत्तेः।अन्वयप्रयोजकरूपत्वेनबाधकप्र
मामात्रविरहोनुमेयइतिचेत्।नाप्तिकानवितथोयंवक्तृत्वात्यपिबाधकसत्वेनव्यभिचारात्।उप
जीव्यत्वेनतथ्येवयोग्यतात्वापत्तेश्चानेवंमेवेतिवाच्यं।आकांक्षामात्रयोःसत्वेअन्वयप्रयोजकरूपत्व

सत्यथनाप्तवाक्येबाधकप्रमायामन्वयाबोधात्।बाधकप्रमाविरहोपिहेतुरितिचेत्तर्हिआकाङ्क्षक
त्वमेवयोग्यता।अन्योन्यते।बाधकप्रमाविरहोयोग्यता।साचेतरपदार्थसंसर्गेऽपरपदार्थनिष्ठान्वयता
भावप्रतियोगित्वप्रमाविशेष्यत्वाभावः।घटमेयंवाक्यमित्यत्रघटमेयनिष्ठान्वयताभावप्रतियोगित्वप्रमावि
शेष्यत्वंगोत्वप्रसिद्धंवाक्यत्वंसंसर्गेतदभावः।वस्तुतस्त्वितरपदार्थसंसर्गेपरपदार्थनिष्ठान्वयताभावप्र
तियोगितावच्छेदकधर्मशून्यत्वंयोग्यतालाघवात्।शक्यज्ञानत्वाच्च।नचनरशिरःशौवानुमानबाधि
तत्वादशौचबोधकशाब्दस्यबाधोवाच्यं।उपजीव्यजातीयत्वेनशाब्दस्यबलवत्वात्।तेनैवतद

DR. BHAU DAJI

नुमानबाधात्। नन्वाकांक्षासन्निभत्वेनशाब्दस्यप्रमाणता नन्वयोग्यतापिन्निवेशिनी। बाधाभावस्यअनु
मानहेतुत्वादितिचेत्। ना बाधेहिप्रमाणदोषोवक्तव्यः अथचाप्रमाणविषयेबाधासंभवात्। य
थानुमानेबाधाऽपाधिकल्पनाद्वारायाप्तिविघातःनिरुपाधौबाधानवकाशात्। सेयंनशब्दरूपमपीप्र
योजिकाशाब्दाभासोच्छेदप्रसंगात्। तन्निश्चयश्चनसंभवत्युपायाभावादितिचेत्। नासंशयविपर्ययव्यु
त्पादनस्यायोग्यताज्ञानमात्रस्यकारणत्वात्। अयोग्यताज्ञानस्यप्रतिबंधकस्यसर्वत्राभावात्। को
विन्नश्चयोपियोग्यानुपलब्ध्या। यथेहघटोनास्तीति। आसन्निश्चायकबाधेनाव्ययप्रतियोगुपस्थि

तिःसाचस्मृतिर्नानुभवोतोनायोग्यताग्रयः। अथनानाविशेषणककर्मककर्तृकरणाधिकरणक्रियादिकमिकपदज्ञा
नजन्यक्रमिकपदार्थस्मृतीनायोगपद्यंनसंभवति। आशुतरविनाशिनांक्रमिकाणांमेलकानुपपत्तेरितिकथं
तावत्पदार्थान्वयबोधः। विशेषणज्ञानसाध्यत्वाद्विशिष्टज्ञानस्येतिचेत्। नाओघप्रत्येकपदानुभवजन्यसं
स्कारमेलकादेकदेवतावत्पदस्मृतिः। तथैकदेवतावत्पदार्थस्मृतौसत्यांवाक्यार्थानुभवः। नचान्यविषयक
संस्कारेणान्यस्मरणमितिवाच्यं। वाक्यार्थानुभवानुपपत्त्याफलबलेनसंस्काराणां परस्परमहकारे
णतत्तदेकस्मरणकल्पनात्। प्रत्येकवर्णसंस्काराणामिवानन्यगतिकतयापदस्मरणे। अथयद्यप्राकां

क्लिष्टंयोयंसंनिधानंसपद्यतेतेनतेनान्वितःस्वार्थःपदैरेवावगम्यते।नचैवमन्वयांतरासंधानंनस्याद्विरथ्या
द्वारासादादितिवाच्यं।एवमपिश्रुतमननक्रमेहेत्वनुपपत्तात्।उत्तरस्यहीदंसामग्रीविकल्पेनसर्वस्यैति
चेत्।अस्तुतावदेवं।तथापिचरमंतावत्पदार्थद्योतितवाक्यार्थानुभवेऽकैवगतिर्नान्यथेतिकृत्वात्।अत्र
वदंति।संनिधिर्नाम्नाद्यजन्मैवान्वयबोधहेतुः।द्वारमित्यादावध्याहृतेनापिपिधानादिनान्वयबोधदर्शनात्
तानवपिधेहीतिशब्दएवाध्याक्रियते।अनुपयोगात्।अर्थस्यैवान्वयप्रतियोगित्वेनोपयोगित्वात्।आ
वश्यकत्वाच्च।अर्थापत्तेरुपपादकविषयत्वात्।नचशब्दमात्रमुपपादकमपितुतदर्थः।अवश्यकल्प्यार्थ

साहचर्यणैवशब्दसंपन्नाद्दृष्टेरन्यथासिद्धेः।अन्यथापदबोधितस्यैवार्थस्यान्वयबोधकत्वमितिनियम
शक्तिकल्पनापत्तेः।स्वार्थान्वयपरत्वाच्छब्दानांद्वारमितिपिधानान्वयबोधकमितितदन्वयबोधार्थमवश्यं
शब्दकल्पनमितिचेत्।नालक्षणायांयत्किंचिन्निमित्तात्।तथाशक्तिसत्त्वेनकल्पनान्वयबोधात्।अथद्वारपदस्यभाव
मात्रंपिधेर्हिशब्दस्यकल्प्यतेलाघवात्।नचपिधानाभिधायकशब्दोपस्थितौविनिगमकविरहः।संस्कारता
रतम्यात्पदविशेषस्मृतिरितिचेत्।न।आकांक्षादिमत्प्रतियोग्यन्वितस्वार्थपरत्वस्यदृष्टत्वात्।लाघवे
नार्थापह्नवात्।नचश्रुतपदानिलक्षणयोजनानीतिकथमध्याहृतैतात्पर्यमितिवाच्यं।श्रुतार्थान्वयस्य

पपत्याध्याहृतेतात्पर्यात्। कथंतर्ह्योदनंपचतीत्यत्रसमभिव्याहृतमात्रावयः कलायादेरपिस्मृतंत्वादि
तिचेत्। तात्पर्यनियमादित्यवेहि। यत्परः शब्दःसशब्दार्थः। अथयातवापिदेववशात्स्मृतकलायादिप
स्थितेनान्वयबोधः स्यात्। अथदेवदत्तओदनमित्यादिवाक्येक्रियपदाध्याहारानाचेनकर्तुरनभिधा
नात्कर्तुःस्मारकमभिहितेतिचेत्। नाअध्याहृतपचतिपदेनापिकर्तुरनभिधानात्। कर्तुःस्मारकमभिहितेतिचे
त्। देवदत्तस्यपाकइत्यत्रापिषष्ठीयापत्तेः। तात्पर्यतस्तत्रव्यवस्थेतिचेत्। तुल्यं। ननुपिधेर्हीत्यादेपि
धानशब्दात्तुभवेपिधानोपस्थापकपदत्वेनजनकत्वमितिचेत्। नाअन्वयप्रतियोगिउपस्थापकपदत्वे

नाप्तीतिचेत्। तर्हीकांक्षायांपदविशेषोपस्थापितत्वंतत्रनतूपस्थितिमात्रे। अथविशेषेअसाधुत्वान्नान्वयबोधइतिचेत्। नापिधेर्हीतिपदंविनापिधानमित्यत्रापिसाधुत्वात्। तत्रार्थेयंसा
साधुत्वस्यतुल्यत्वात्। साधुत्वज्ञानस्यान्वयबोधजनकत्वाच्च। गौरवात्। अपभ्रंशादन्वयबोधाच्च। नचाप्तेसंशयाद्दः। बाधकाभावात्। तस्मात्क्रियापदस्यपदेनकारकपदस्य
क्रियापदेनसहान्वयबोधकत्वे। नत्वेकंविनापरस्याअपिचाप्तकर्मकक्रियापदयोर्गंविनाद्वितीयानुपपत्तिः। नहिक्रियापदार्थयोगेद्वितीया। घटमानयनंकृतिरित्यत्रापिद्वि
तीयापत्तेः। तथाउद्घोषयइत्यत्रस्मरयतिपदाध्याहारंविनावक्तुर्थंनुपपत्तिः। यदिवस्मरयतिपदार्थयोगेवक्तुर्थीतदाऽष्यभिज्ञतीत्यत्रापिस्मारयतीच्छतिपद

नजनकत्वात्। ननुतऽपस्थापकयावत्पदत्वेनगौरवात्। एवंपिधानान्वयबोधेपिअध्यापोणोल्लो
णिकयोरन्वयबोधोनस्यात्। क्वयोरनुभावकत्वादितिचेत्। उच्यते। क्रियापदेपस्थापितक्रियाकार
कपदोपस्थापितेचकारकंपरस्परमाकांक्षतिनतूपस्थितमात्रे। अथयाद्वारंकर्मतापिधानेक्षतिरित्य
त्रापिक्रियाकर्मीध्याहारश्चान्वयबोधप्रसंगः। क्रियायाःकर्मणश्चोपस्थितेस्तुल्यत्वात्। एवंविधपदो
पस्थापितेपरस्परमाकांक्षाकृपदाध्याहारःसाधुत्वायमावश्यकइतितज्ज्ञेयंवोपस्थितिरन्वयबोधोप
यिकी। तस्मात्क्रियाकारकपदोपस्थापितयोरेवक्रियाकारकयोःपरस्परमन्वयइतिशब्दाध्याहार

योरेकार्थत्वात्। अथसाधुत्वार्थंद्वारंउद्घोषयइत्यत्रापिवेहिस्मरयतिपदाध्याहारीउमन्यतेनतुअन्वयबोधार्थं। तस्मादन्वयप्रतियोगिज्ञानादेवोपपत्तेरितिचेत्। नहि
क्रियापदयोर्गंविनाकारकविभक्तिः। कारकपदयोर्गंविनानतुअन्वययोग्यंक्रियापदमितिकेवलेकारकेक्रियापदाध्याहारःकेवलक्रियायांचकारं ५

एवाकर्त्रीत्वेपेतुवक्ष्यामः।तात्पर्याधीनंशब्दप्रामाण्यंतत्रतत्परत्वेनतत्साध्यकत्वं।पदार्थतत्संसर्गयोः आ
दासाध्यत्वात्।अथतत्रोचरप्रवृत्तिनिवृत्तिसाध्यकत्वंतत्परत्वं।तच्चसाध्यार्थस्यसाक्षात्भूतार्थस्यच
प्रशंसानिंदावाक्यस्यप्रशस्यनिंदितस्वार्थप्रतिपादनद्वारा।लाक्षणिकस्यलक्षणीयविषयप्रवृत्तिनि
२३ वृत्तिजनकत्वंतत्परत्वंमितिचेत्।नातत्परत्वेनज्ञानंजनयित्वातत्रप्रवर्तकत्वंतत्प्रवर्तकंचतत्सत्व २३
मितिपरस्पराश्रयात्।लाक्षणिकस्यानुभावकत्वेपिलक्षणीयपरत्वात्।काष्ठादेःस्वप्रकाशमान
मात्रपरत्वेनापिपर्यवसानाच्च।नचतद्बुद्धिजनकत्वंतत्परत्वं।प्रशंसानिंदावाक्यमपिप्रशस्यनिंदित

स्वार्थधीहेतुत्वेनतत्परमेवातच्चज्ञानंप्रशस्येमर्दःप्रवर्त्ततेनिंदितात्तुनिवर्त्ततइतिस्वविषयेप्रवृत्तिनि
तज्ञप्ति२ वृत्तीजनयतीतितत्परमुच्यतेवेत्यनागौणलाक्षणिकयोरनुभावकत्वात्।तद्बुद्धिजननेतत्परत्वमि
त्यन्योन्याश्रयाच्च।तज्जननयोग्यत्वमितिचेत्।तर्ह्यकस्योच्चारणेनानार्थेनानार्थपरत्वंलक्षणायांच
मुख्यार्थपरत्वंस्यात्।योग्यतासत्वात्।नापितत्प्रतिपाद्यकत्वं।तात्पर्यंविनाननर्थेत्यन्योन्याश्रया
त्।प्रशंसादिवाक्यस्यप्रवृत्त्याद्यप्रतिपादकत्वात्।लाक्षणिकस्याप्रतिपादत्वाच्च।अथगौणपदं
स्वार्थंविनाभावितार्थंप्रतिपद्यतत्परमितिचेत्।नामंत्रादेःक्रीडंतीत्यत्रतेनविनापिप्रयुक्तेतात्पर्य

तात्पर्यात्पदस्य तत्पदादिपरंपरमेतीत्यपरं चेत्यात्। अविनाभावव्यतावस्थात्। तुमेबाधकेसतीति
चेत्। तर्हि मुख्यार्थपरतैवनस्यात्। नस्याच्चागच्छगच्छसीत्यत्रगमनाभावपरत्वं। उच्यते। तत्प्रयोज
नकत्वंतत्परत्वं। तदर्थः प्रतीतिः पदनिष्ठनिश्च। प्रयोजनत्वंचनसाध्यत्वंश्रोत्याश्रयात्। नापि
प्रतिपाद्येच्छाविषयत्वं। यस्यस्यदिच्छाविषयस्यप्रतितत्परत्वापत्तेः। तदर्थसाध्यत्वेनेच्छानियमइतिचे २५
त्। नाऽदृष्टमऽत्यवज्ञाद्यज्ञाद्यप्रेरेनसाध्यंवऽविधतयावाक्यभेदप्रसंगात्। प्रमिच्छायानियंत्र
मशक्यत्वात्। किंत्वप्रतिपादकेच्छाविषयत्वं। यःशब्दोवक्तायदिच्छयाप्रयुक्तः सतत्परः। सचेच्छा

प्रतिपाद्यधीपदनिष्ठनिविषयाश्रितत्परत्वं। नानार्थाभिधाऽनेकपदा[illegible]त्वितेकक्रियापदा
न्मुख्यलाक्षणिकपरादृष्ट्याऽक्रमेणानेकार्थज्ञानंनत्वेकदैवे। सक्रऽउच्चरितस्यसक्रदर्थपरत्वनि
नियमनेकयोच्चारणेनानेकपरत्वभावादिनिखलतांत्रिकेकवाक्यतयावदंति। अत्रब्रूमः॥ अ
नेकार्थप्रतीतीच्छयैकमुच्चारणंभवत्येवप्रमिछायानियंतुमशक्यत्वात्। यदिचतऽउच्चारणंनानेका
र्थपरंतदाऽदृष्टविरुद्धंस्यात्। तात्पर्यनिर्वाहार्थमादृष्टेःकल्पनात्। यथैकपरेपितरापत्तेः। अ
तएवतऽउच्चारणस्योभयपरतायांमादृष्टिकल्पनं। तस्मात्तुल्यवदनेकार्थोपस्थितौतात्पर्यादि

ज्ञानेयुगपदेवान्वयबोधोभवति।सामग्र्यासुल्यत्वात्।प्रथममेकस्यान्वयबोधोनतरस्येतिनियं
तुमशक्यत्वाच्च।अथविवक्षाधीनमन्नपदोच्चारणंएकशक्तिविषयमेवानुभावयतिएकपदो
च्चारणत्वाच्चपदोच्चारणवत्। यद्वैकेनोच्चारणेनानाशक्त्यानार्थीननुभावकत्वेनानार्थीत्वादेकपद २५
नानार्थपदोच्चारणवदितिचेत्।नाअनेकानुभवसामग्र्यासत्वेनबाधितत्वात्।सामग्र्याविरहस्योपा २५
धित्वाच्च।अतएवान्नमानयेत्युक्तेभिन्नप्रकरणादिनाभिन्नेतात्पर्यग्रहायांप्रथमेवाक्यादिपाद्ययोरेक
देवाकांक्षिविनाऽनेकार्थप्रतीतिर्नतुतत्रैकोविलंबते।एवंचेदंपरंचानयेत्यत्रानयपदस्योभयपरत्वे

एकदेवान्वयबोधोनत्वाकांक्षिवाक्यमेवास्त्वर्थमेवान्नज्ञापितात्।गंगायांजलंघोषश्चवसतीत्यत्रगंगापद
स्यतात्पर्यवशाद्घोषेगत्वावहतीरयोरेकदोपस्थितौजलघोषयोरेकदोपस्थितौजलघोषयोरेकदेवा
न्वयबोधः।नन्वयुगपदाकांक्षयापत्तिःसृष्टत्वात्।तात्पर्याकांक्षिर्नतुदृष्टत्यनुरोधात्तात्पर्यं।गौणलाक्षणि
कयोस्तुल्येदापत्तेः।तात्पर्यनिर्वाहार्थंतयोराकांक्षित्वेनकल्पनात्।मुख्यलाक्षणिकयोरेकैकमात्रपरत्वेयुग
पदाकांक्षयाविरोधः।अनेकान्वयबोधपरत्वेदाकांक्षयाविरोधस्यदोषत्वेपरिभाषापत्तेः।यत्रमुख्यार्थज्ञा
नत्वेनप्रथमंवाक्यबोधोनंतरंलाक्षणिकान्वयबोधस्तत्राकांक्षिरेव।तस्माद्युगपत्तात्पर्यग्रहेतिना

दृष्टिः किंतत्रैकार्थ्यपरत्वेसत्येवंयत्रतात्पर्यबोधकक्रमादन्वयबोधकक्रमसत्त्वादृष्टिःप्रथमोच्चारणस्यप
र्यवसितत्वादिति।एवंचलोकेत्क्वाप्यन्वयेवेदेपीदंतात्पर्यमितितस्यपौरुषेयत्वं।अत्रमीमांसकाःयथोच्चा
रणपूर्वकत्वाऽध्ययनंवेदेपरतंत्रंतथातात्पर्यपूर्वकमेवेतिपरतंत्रेनतुल्यत्वेपि प्रथमेतात्पर्यमनादि
त्वात्पूर्ववाक्यार्थज्ञानेच्छयोच्चारणमुपजीव्याग्निमाग्निमत्यतद्विच्छयोच्चारणात्।तद्विच्छयातदुच्चार २६
णेवहितत्परत्वलोकवेदसाधारणं।सावेच्छाशास्त्रतंत्रावेतिनकश्चिद्विशेषः।तदवधारणंचानयोर्मी
मांसा[illegible]परिशीलितव्याचवेदेस्तुमयदादिसिद्धं।अतस्तात्पर्यानुरोधान्नवेदस्यपौरुषेयत्वंनच
पूर्ववत् ज्ञानं विनोच्चारितवेदवाक्यजन्यधीः वाक्यार्थज्ञानं विनातदर्थ।

पतीतीच्छयोच्चारणमात्रात्प्रतिपुरुषमुच्चारणस्यभेदादितिचेत्।तर्हिपठ्यमानभारतादिनयाभूता
दर्थधीर्नस्यात्।व्याप्तिग्रहेच्छयायदुच्चारणंहतंतज्जातीयत्वादर्थज्ञानंविनापिपठ्यमानभारतादर्थ
धीरितिचेत्।तर्हिवेदेपिठल्यं।ततात्पर्यकजातीयत्वस्यनियामकत्वात्।अथापठ्यमानवेदात्तथा
र्थधीर्नस्यात्।ईश्वराप्रणीतत्वात्।अथवेदःपौरुषेयोवाक्यत्वात्भारतवदितिचेत्।कोवेदः।अ
नुगतधर्मीभावेनतस्यशाखासुनानार्थत्वात्। तथाहि।नहुरम्वेदपदप्रयोगविषयोवेदः।मुख्यार्थ
र्थाकल्पनात्वानापिज्ञातसमुदायः।तस्यवेदनिरूप्यत्वात्। समुदायस्यापतिपादकत्वेनवाक्यत्वा

सिद्धेश्च नापि स्वर्गकामादिवाक्यं स्मृतिभारतादेरपि तथात्वात् नापि संदिग्धकर्तृकं वाक्यं वादिनो निश्च
यात् वाद्यनुमानयोस्तुल्यत्वेन मध्यस्थस्य संशयः इति चेत् तर्ह्यनुमानाभ्यां मध्यस्थस्य संशयो मध्यस्थ
संशयानंतरं वानुमानमित्यौद्धाप्रयः नापि विवादाध्यासितं वाक्यं अनुगतधर्मेण विवादस्या
२७ स्पदत्वात् भारतादावपि तत्संभवाच्च नापि महाजनानां वेदाकारानुगतस्मरणहारावेदत्वं जातिः वि
वदनीयत्वानुमापकशरीरनिर्जातिभिः संकरप्रसंगात् किंच पौरुषेयत्वेन तदर्थबोधजन्यत्वं तु
च्चारणधीप्रभवत्वं वा अध्यापकतदुभयधीजन्यत्वेन सिद्धसाधनात् नास्मरणाद्यसादित्वं पक्षस्य

DR. BHAU DAJI

रणाद्यसादित्वं [redacted] नापि स्वतंत्रपुरुषप्रणीतत्वं पद्यमानवेदभारतयोस्सदृभावा
त् तज्जातीयः स्वतंत्रपुरुषप्रणीत इति चेत् तर्हि पद्यमाने भारतेऽध्यासत्यनमेतिकथस्यात् स्वा
तंत्र्येणपद्यु च्चारणयत्नो तदानमापि उच्चारणसामान्येन ध्यासस्यापि किंच स्वतंत्रप्रणीतजातीय
त्वंयदिसाध्यंतदाद्यभारते स्मृतौचवाक्यत्वमनैकांतिकं नहितज्जातीयं स्वतंत्रपुरुषप्रणीतमस्मि
। अथस्वतंत्रपुरुषकृतत्वेदज्जातीयंस्वतंत्रपुरुषप्रणीतमित्यनिर्धारि तविशेषंसाध्यंजीवीक्वचि
दस्मीतिवदितिचेत् नापद्यमानभारतेध्यसिद्धेरागात् अथार्थप्रतीत्यतदर्थपरतयाप्रतिसंधीयमा

जपदत्वं पौरुषेयत्वं। तच्च प्रथमप्रमाणस्वरूपकत्वात्। ततएवानुच्चरितोपि सोनिश्लोकः पौरुषेय इतिचेन्न। अर्थज्ञानवतार्थापकेनसिद्धसाधनात्। अथयाप्रथमानवेदभारताद्यर्थमिवागात्। अतएव वेदत्वं स्वतंत्रप्रणीतदृष्टिवाक्यदृष्टिधर्मत्वात्। भारतत्ववदिति निरस्तं। स्वतंत्रप्रणीतत्वं हिवाक्यार्थगोचरयथार्थज्ञानविरम्भापयित्रयोच्चारणंतथाचतथाविधाद्यापकेनसिद्धसाधनं। एतेनस्वस्वत्वानुवक्तृत्वयोर्निरस्तं। लोकसिद्धत्वात्प्रमवक्तृत्वंसाध्यमितिनिरस्तं। नापिसजातीयोच्चारणानपेक्षोच्चारणंपौरुषेयत्वं। प्रथमानवेदेबाधात्। भारतेव्यभिचाराच्च। उच्यते। शास्त्रतउपजीविप्रमाणा

२८

तिरिक्तप्रमाणाजन्यप्रमितिविषयार्थत्वसतिशब्दजन्यवाक्यार्थतानाजन्यप्रमाणंवेदत्वेईश्वरप्रमाद्या। स्मृतीनांभारतादिनाव्यभिचारस्यवेदुसमानार्थतयाशब्दजन्यत्वात्

जन्या।

अजन्यत्वात्तावेदार्थस्यानुमानादिविषयत्वेपिआप्तमानादेर्वेदोपजीवकत्वात्तावेदादर्थप्रतीत्यतत्प्रमाण्यनात्। सजातीयोच्चारणानपेक्षोच्चरितजातीयत्वंपौरुषेयत्वं। आद्यभारतेपितज्जातीयत्वान्नव्यभिचारः। अथवावेदत्वंतज्जातीयोच्चारणानपेक्षोच्चारितदृष्टिप्रमाणतावच्छेदकवाक्यधर्मत्वात्स्मृतित्ववत्। यावेदाःशास्त्रजन्यवाक्यार्थगोचरयथार्थज्ञानजन्याःप्रमाणंशास्त्रत्वात्। नचप्रथमानवेदेवाधोभारतेमवादिस्मृतौचव्यभिचारः। तेषांविकर्तृकत्वात्। तादृशज्ञानजन्यजातीयत्वंवासाध्यं। तवाप्येतदभावादेववेदेःपौरुषेयत्वव्यवहारः। नचप्रयोजकमिदंवाक्यार्थगोचरयथार्थज्ञानपूर्वकत्वमेवशास्त्रप्रामाण्ये

मातवत्तः

तंचेनन्तुताद्दशज्ञानस्यशब्दाजन्यत्वमपि।गौरवात्। अथयथावेदेतत्कर्तृकत्वेनप्रामाण्यंस्यात्तालोके
तथादर्शनात्। एवंवानादिमीमांसासिद्ध्यायेनावगततात्पर्यावेदार्थंप्रतीत्वपूर्वपूर्वाध्यापकेनोच्चारि
तावेदाउच्चरीत्तरस्याध्ययनंतदर्थप्रतीतिरित्यनादितैव।अतः किंस्वतंत्रपुरुषेणतत्प्रयोजनस्यपरत
त्रादेवसिद्धेः।किंच।पूर्वकालीनवेदपूर्वः।कालत्वात्। वर्त्तमानकालवत्।नचांशेवाधः।अंशेवाश्रया सि
द्धिः।अंशत्वेनानुपादानात्।पूर्वकालीनवेदपूर्वउच्चरेदंशतोसिद्धेरंशतोसिद्धसाधनं।तथापूर्वका २९
लीनंवेदाध्ययनंपूर्वाध्ययनपूर्वकं।अध्ययनत्वात्।इदानींतनाध्ययनवत्।नचलिष्टनुमितवेदाध्ययनेष्व

मिचारः।लिपेरर्थाध्ययनपूर्वकत्वात्।नचेवंभारताध्ययनमपितथास्यात्।तच्चभारतादावेवव्यासादिकर्तृक
त्वेनकथनादिति।उच्यते।वेदप्रामाण्याधीनंतत्प्रामाण्यमित्यात्माश्रयः।नचपूर्ववेदप्रामाण्याधीनउत्तर
वेदप्रामाण्यमितिशक्यंभेदमादायनात्माश्रयइतिवाच्यं।एवंतत्पूर्वस्यापितत्पूर्वप्रामाण्यात्प्रामाण्यमि
त्यनवस्थानात्। अनादित्वादयमदोषइतिचेत्।नहिमूलभूतप्रमाणंतत्प्रामाण्यादेःपरंपरयापातात्। स्वतःप्रमा
णंवेदएववेदेसर्वत्रमूलमितिचेत्।नासर्वेषामेवापरवेदापेक्षत्वेनस्वतःप्रमाणत्वाभावात्।अतएववाचा
स्पतिःस्पतेरावारइत्यत्रविश्वासबीजपरानपेक्षमूलभूतप्रमाणाभावादंधपरंपरान्यायेनतत्रवेदः मूलक

त्वकल्पना। अनादिमहाजनपरिग्रहादनादिवेदप्रवाहप्रामाण्यावधारणेपितन्निर्वाहकैतरानपेक्षमूलकल्पनानुपपत्तेः
प्रमाणभावेनानाश्वासात्। अन्यथास्मृत्याचरणयोरप्येवंप्रामाण्यावधारणेप्रमाणांतरमूलकल्पनानुपपत्तेः।
तस्मादाश्वासबीजपरानपेक्षेश्वरप्रत्यक्षमूलकत्वादेववेदस्यप्रामाण्यंमहाजनपरिग्रहादेवावधार्यतेऽए
तेनानुमानमपिपरास्तं। मूलदूषणप्रत्यक्षंविनावेदप्रामाण्योपपत्त्यासाध्यावसितेरावाधात्। ननुवेदोन
पौरुषेयोस्मर्यमाणकर्तृकत्वादितिबाधकमस्तितिचेत्। कपिलकणादगोतमेष्वद्यतनेष्वाद्यपर्यंतंवेदस्म
कर्तृकत्वस्मरणात्। नचमूलदूषणानुमानादेवानुमवात्। अस्मरणमे ३०

भावात्

वतचबाधकमितिचेत्। नाएवंसत्यस्मरणानुभवयोरेकाश्रयात्। अन्येतदर्थस्मरणाभावेपिप्रमाणाद्यनुभावकत्वात्। नहिभावि
विस्मरणप्रयोक्तृप्रमाणमनुभावकंतस्मान्नपक्षेपानाद्यनवारोवेदाअजायंतऋचःसामानिजज्ञिरेइतिकर्तृस्मरणात्। प्रतिमन्वंतरंचै
षांश्रुतिरन्याविधीयतइत्यादिकर्तृस्मरणाच्चपौरुषेयत्वेबाधकंविनाऽर्थवादमात्रत्वस्यवक्तुमशक्यत्वादिति। सर्वंसूरेरुभगवत्पादै
र्गीतंस्वयाप्युक्तंशिवाद्याऋषिपर्यंतास्मन्नरोद्यनुकारकाइतिमहाभारतपुराणादिवाक्यस्यश्रुतिविरोधेनाप्यतात्पर्यात्व
॥नचकार्यएवप्रमाणंकर्तृस्मरणस्यसर्वत्रविध्यर्थत्वात्। सकर्तृकार्थवादस्यस्वर्गनरकार्थवादस्येवेश्वरउपासीतेतिविधेरे
षत्वाच्च। साध्यविशिष्टेचसिद्धार्थस्यप्रामाण्यं। नचेवमानंदोपीश्वरइतिवाच्यं। तत्रमानांतरविरोधात्। इहपरत्रचप्रप्र

दादिभूयिष्ठत्वेनवेदेनाप्यासङ्गतिरेवेत्यनधर्मिण्याहकेननित्यसर्वज्ञत्वसिद्धेस्तत्रदोषाभावादिति।नन्वतथाप्रयोजकंपौरुषेयत्वा
नुमानंकिंत्यनिरस्तमेवेनेवप्रामाण्योपपत्तेरितिचेत्।तावर्णानामनित्यत्वेनतत्समूहस्यसुतरामनित्यत्वात्।नचतदसिद्धंतथा
हि।वर्णात्मकःशब्दोऽनित्यःसमवेतत्वेसतित्यनित्यधर्मत्वाद्वाघटवद्वानवरेत्वसिद्धिः।उत्पन्नोगकारोऽदृष्टउत्पद्यमानःको ३१
लाहलइतिप्रत्ययाद्वानचव्यंजकाभावाद्वाप्रागनुपलब्धत्वोपलब्धिमात्रेतत्त्वउत्पन्नोगकारोऽदृष्टायमितिप्रत्ययाद्वा।नवायमे
षाधिकः।अथोत्पन्नावर्णेऽस्मिंश्चरमाणायामपितदनुसरणाद्वानवस्मर्यमाणोरोधकाभावाद्वा।अथयद्यप्युत्पत्तिरपिनाशे
क्षेद्वा।यदुक्तोत्पादविधानात्तदपहस्तितमित्यबाधितानुभवसमर्थाच्चोदनयाहीनुपेक्षाकत्वाद्वा।श्रोत्रेयाहयेवानुभूतौ।सावयवसम

तत्वोः मः

ह्मारोगकारस्त्रीरान्मदोद्यइत्यत्रयथासिद्धत्वात्तन्निवेशोनदोष इत्यत्रवेत्यादिकेइत्यत्रप्रत्यक्षादयतत्प्रमाणं।त
त्क्रियोपयुक्तेत्वेनभासतेसतत्धर्मएवनथासतिरक्तःपटोलोहितःस्फटिकइत्यादावपितथात्वादविशेषात्।नैरक्तत्वादीनांसत्य
धर्मत्वस्थितौस्फटिकादीनांचतद्विरुद्धधर्मत्वेस्थितेजपाकुसुमादेरत्वयत्तिरेकोऽविधानात्।धेनतत्रधर्मांतत्वात्।नवेहतारत्व
देरत्यधर्मत्वेनोपस्थितिः।नापिगकारादीनांतद्विरुद्धधर्मत्वं।नाप्यत्यन्ताभावत्वादिधर्मिणेऽविधानं।नवावश्यंस्वीकृतवायोरेव
धर्मीसारत्वादयोगकारादिगतत्वेनभासतइतिवाच्यं।स्पर्शीयहित्वेत्याद्यापाराभावेनतत्वेनातदयहात्।नचैवंवसातइः।अवायवी
यत्वेनवायुमात्रेधर्मीयाहकत्वात्तच्छून्यत्वं।सारत्वादयोनवायुधर्मीयाहकत्वात्तच्छून्यत्वंसारत्वादयोवावायुधर्मीःश्रावणत्वात्।का

मात्रा१ धर्मग्राहकनि२ त्वात्२

दिवत्।वायुर्वानश्रवणयाह्योधर्मीमूर्त्तत्वात्पटवत्।अतएवतारत्वदयोनवायुधर्मीः।वायुधर्मग्राहकनियमहात्।नचघनिरूपःसंश्लेषोभेदश्चनिरेवा
तथासतितद्धर्मतारत्वादियहःप्रवर्त्तेतिवाच्यं।तिरोयंगकारइत्यत्रघनीनामिस्फुरणात्।तत्कारणाभावाच्चानवद्यत्वेनाज्ञातिस्फुरणं
।तथाद्यक्षिणसानसंवित्संवेद्यत्वेवा।नचसमर्थमाणतारत्वाद्याक्षेपः।बाधकाभावात्।प्रथमतस्तद्ग्रहणप्रसंगाच्चेतिसिद्धं।तारत्वा
योनकगकारादिजातयः।गत्वादिनासंकरप्रसंगात्।नचनानैवतारत्वं।तारगकारत्वगतप्रत्ययाभावप्रसंगात्।नचसजातीयसाक्षात्कार
प्रतिबंधकतावच्छेदकशरीरद्वयवृत्तिजातित्वेननानातारत्वेप्रवृत्तगमः।तत्प्रतिसंधानेपितारत्वानुगतप्रत्ययात्।तारत्वंसदृत्वेवनशरीरद्वयवृत्तिजा
ती।सप्रतियोगिकत्वात्।नापितारत्वंसदृत्वयोर्विरोधः।यएवगकारस्तारइतीतिसमयसदेववृत्तयोरेकत्वप्रती

वक्तृभेदनि२

तेः। तारोयंनतारंतरस्तारान्मंदोऽयंइतिभेदप्रतीतिरस्तीतिचेत्। ना। धर्मिणोऽभेदेसतिधर्मेऽपि
यत्वात्। एकत्रघटेलोहितोयंनत्र्यामइदानीमितिप्रतीतिवत्। नचतीव्रेणगकारेणमंदगकारस्याभिन्नत्वान्नयोर्भेदः। नहितेनैवरूपेण
भिन्नावकौ। तस्यैवतेनैवतद्वैपरीत्यंहरणायहरणयोर्विरोधादितिवाच्यं। तारत्वंह्यजकवर्णीयंबलवत्त्वेनमंदत्वंह्यजकवर्णाद्भिन्नमवान्तरं
स्यायहणात्। संतुवातारमंदरूपाभिन्नाएवगकारास्तत्तत्प्रतिज्ञाबाधकाभावात्। तस्माद्वायुधर्मीएवतारत्वादयःश्रोत्रगतविशेषा
संतेदर्पणादिधर्माश्चमुखादौतत्प्रहणंवस्पर्शेऽरङ्कारेणाकर्णशष्कुलीत्वगिंद्रियेण। तारमंदजनकोवायूनांत्वयापुनर्योपकर्षोयोऽसौ
स्पर्शस्यचस्वीकारात्। श्रोत्रेणैववाचङ्गारादेर्यन्नवायुधर्मत्वंहस्तत्रायोग्यत्वमुपाधिः। अन्यथाश्रोत्रेणचगुणोनगृह्येत। इंद्रियेतरग्रा

DR BHAU DAJI MEMORIAL

ह्यत्वंनोत्रचक्षुर्वान्नपार्थिवरूपयाहकांत्रपार्थिवेंद्रियत्वान्नरसनेंद्रियवदित्यप्यसत्। अन्यथायोयोयोनगृह्यतेसगुणःपरगु
णोवा। योयतादृफलबलेनकल्प्यतेनहींत्रोत्रस्यापिवायुधर्मत्वंग्रहेतुव्यंनचतरंगकारश्रुत्यत्रवायोरुक्तीतिः। वायुत्वदिनाःप्रतीता
वपितारत्वादिनैवतत्वतीतेः। यथाग्निनैवप्रतीतावपित्रयोगोलकेलोहितत्वप्रतीतिः। नचवायुश्चाक्षुषश्चात्रोत्रेणवापिहेकेनतारो
यंगकारश्रुत्यारोपइतिचेत्। उभयेंद्रियग्राह्ययोरसंसर्गाग्रहात्तत्संसर्गग्रहव्यवहारः। अस्तुवात्वंगिंद्रियोपनीतस्यश्रोत्रेणारोपः। श्रो
त्रेणैववातारत्वंग्रहेपीत्युक्तं। उत्पत्तिमत्वंवासिद्धं। तत्वतीतेः। श्रुतपूर्वयंगकारश्रुतिपत्यभिज्ञानबाधितत्वात्। नचप्रत्यभिज्ञैवत
याबाधितागौरवेणाद्यौपाधिकोऽभेदश्रुत्ययोगकारसंसर्गतीत्युक्तमितिचेत्। ना। गौरवंजातेरसिद्धेः। भेदेसतिसंसर्गेह्यभेदप्रतीतिर्जी

३४

तिमालंबते। नचगकारेभेदप्रतीतिरस्ति। तारत्वमंदत्वेऽप्रतिभेदहेतू। यएवतारःसएवेदानींमंदऽतिप्रत्यभिज्ञानात्। गकारानित्यत्वेपितथासंभवतीतिचेन्न। तद्हिनित्यत्वेपिकर्णशष्कुलीवत्गिंडियोप्रतीतबाध्यधर्मोत्पत्तेरुपाधित्वंसंभवतीति। नचवायोरप्रतीतिःउत्पन्नत्वेनैवतत्प्रतीतेः। लोहितत्वेनेवजपाकुसुमस्यस्फटिके। असुवाशगतुपलब्धामानत्वेनोत्पन्नसाहश्येनस्मृतोत्पत्तिमत्वारीयः। नचैवंघटादावेपिनोत्पत्तिःसिध्येदितिवाच्यं। कुलालव्यापारानंतरमनुभूयमानघटस्यतद्व्यापारात्प्रागनुह्यमानघटेनतभेदेनोभासतेकिंत्वभेदएवेतितत्रधीगमत्वेसतिसत्वंसिध्यतिगकारेत्वत्पत्तीत्यनंतरंकंठताल्वादिव्यापारात्पूर्वमनुभूयमानगकारेणाभेदप्रत्यभिज्ञानाद्दीपवत्सध्यंजकएवाअथशब्दउत्पद्यते। उत्कर्षवद्वेसत्यपकर्षवत्वान्मार्जुर्यवत्। अतएवंवानित्य

३४

त्वमितिचेद्यानंतारत्वमंदत्वयोरुत्कर्षापकर्षयोर्गकारेपूर्वव्यायेनासिद्धेःसिद्धौवाजातिसंकरभयेनोत्कर्षापकर्षयोर्जात्योरसत्वशब्दनित्यत्वयोर्नानात्वेनरसशब्दसाधारण्याभावात्। अतएवसजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकसामान्यमुत्कर्षः।तत्प्रतिबंधनीयसाक्षात्कारविषयतावच्छेदकसामान्यमपकर्षइतिसाधारणोहेतुरयाक्षः। तारत्वादेर्गकारजन्यत्वासिद्धेः। साधनावच्छिन्नसाध्यव्यापकत्वमूर्तगुणत्वस्यैवत्वस्यवोपाधित्वादप्रयोजकत्वाच्चनहिगकारणाधीनएवोत्कर्षोपकर्षश्चपरमहतिपरिमाणेपरमाणुपरिमाणेचप्रत्येकंसत्वात्। नवोभयत्रैकत्वसत्वंकारणंप्रयोज्यं। एकैकत्वहेतोरपिप्रत्येकमेकैकत्वात्। तस्यादेतत्। श्रोत्रव्यापारानंतरमिदानींश्रुतपूर्वेगकारेणास्तिविनष्टःकोलाहइतिधीतेःप्रत्यक्षत्ववन्नादानित्यत्वंविनाशित्वाव

त्वेनोत्पत्तिमत्वानुमानाच्च। प्रत्यक्षप्रतियोगिकाभावत्वेन हि प्रत्यक्षत्वं ध्वंसस्याक्षटध्वंसवत्। नतु विनाशस्य हेतुप्रतियोगिसमवायिप्रत्यक्षत्वेतंत्रं। धर्माधर्मादावत्यप्रत्यक्षत्वापत्तेः। न हींद्रियाग्राह्येपि प्रतियोगिसमवायिनिगंधरसाभावयोर्ग्रहणाच्च। नोभयंगौरवात्। स्थितेघटेसंयोगध्वंसाप्रत्यक्षत्वापातात्च। नवप्रतियोगियोस्तत्वंतत्त्वेवायुस्पर्शध्वंसेपिप्रत्यक्षःस्यादितिवाच्यं। आश्रयनाशजन्यत्वस्यैकेंद्रियसंनिकर्षाभावात्। किंच। यत्समवेयन्नानुपलब्धिर्विरोधितस्याभावस्तत्रदृष्टस्यतदितियोग्यानुपलब्ध्यर्थः। अतएवपृथिवीत्वाभावोजलपरमाणौनप्रत्यक्षः। प्रत्यक्षश्चवायौरूपाभावः। अस्तिचतयाग्रहेतत्यसत्वेसमवधानेचप्रतीतिप्रसंगात्। निरधिकरणाभावप्रतीतिर्नीलाप्रतीतेः। तस्माद्यत्राधिकरणेदृश्येसम १

येवाप्रतियोगिवर्त्ततेतत्रतदभावोनिरुप्यते। [illegible]एवसत्यामभावोनिरुप्यतइत्युक्तंप्राङ्नाशाभाव्यत्वभावतएवसंनिकृष्टत्वान्नाश्रयसंनिकर्षापेक्षा। इंद्रियविशेषणतयानाभावग्रहणमितिचेत्। नाश्रयोयत्वत्याधिकत्वात्। अत्यंतायोगव्यवच्छेदकसमवायेनग्रहःस्यादितिचेत्। मैवं। सतएवग्राह्यव्यंजकविरहादनुपलब्धिर्नतुध्वंसस्यात्यंतरसकलतदनुपलंभकसमवधानेतदनुपलब्धिरूपयोग्यानुपलब्धेरभावात्। प्रतियोग्युपलंभकव्यंजकयोरभावात्। विनष्टप्रतीतिरपित्वंद्रियोपनीतव्यंजकवायुस्पर्शध्वंसोपाधिकेवावायुर्नोत्पादकः किंतुव्यंजकइतिकिंविनिगमकमितिचेत्। इदानींश्रुतपूर्वोगकारोनास्तिविनष्टःकोलाहलइतिप्रतीत्यनंतरंपुनःश्रवणेश्रुतपूर्वएवायंगकारःपुनःसएवायंकोलाहलइतिप्रत्यभिज्ञानमे

व। घटध्वंसप्रतीत्यनंतरंचनघटप्रत्यभिज्ञानमितितत्रविनष्टप्रतीत्याध्वंसएवसिध्यति। अतएवतारतम्यतारतरत्वमंदत्वमंद तर
त्वप्रतीतीनांध्वंसत्वकल्पनाघटंप्रत्यभिज्ञानमात्रेणप्रमत्वकल्पनमित्यपास्तं। एतासुसतीष्वपिघटप्रत्यभिज्ञानात्। त्यादे
३६ तत्। ग्राह्यप्रयत्नसाध्यतद्ग्रहणमिष्यतेसतितद्ग्रहणंतरमुपलभ्यमानत्वात्। पटवत्। अभिव्यंजकत्वंहीन्द्रियसंबंधप्रतिबंधापने ३६
यकत्वात्। इंद्रियसंनिधापकत्वाच्चाक्षुषोत्सारणेनेवपटादीनां। तद्ग्रहणमपिज्ञानेनसमंभवति। नित्यसमवेतत्वेनावरणापनयन
संनिधापनयोरभावात्। नापिश्रोत्रसंस्कारात्। इंद्रियसंस्कारकत्वोन्मीलनालोकादेःसहकारिंद्रियसंबंधोयसर्वार्थोपलब्ध
कूलसंस्कारजनकत्वंदृष्टं। तद्घाघुरपिसंस्कारेवसर्वज्ञोपलब्धव्यकूलंश्रोत्रेसंस्कारमाधत्ते। तथावसर्वज्ञोपलब्धि

तद्भोसंस्कारध्वंसंस्कृतंश्रोत्रेसर्वस्यग्रहानुपकाशयेत्। घटोयोन्मीलितंचक्षुःपरंनहिनबुध्यतइति। अथावयव
तिरेकाभ्योकार्यप्रतिनियतजनकजन्यत्ववच्छेदेपिनियतव्यंजकध्यंयत्वमितिचेत्। नावर्णोहिनप्रतिनियत
व्यंजकध्यंयाः। एकावच्छेदेनसमानदेशत्वेमतिसमानेंद्रियग्राह्यत्वात्। घटगतैकत्वपरिमाणवत्। नवावयव
संयोगवज्जात्वाव्यंजकध्यंयेनावयविनाउत्पलत्वंव्यंजकदीपाद्यंयेनतन्मीलितंघटइतिदृष्टंव्यंजकध्यं
येनैकत्वेनतन्निवारः। अवयवसंयोगावयविनोन्मीलोत्पलत्वयोश्चाश्रयाश्रयिदृष्टत्वेनोत्पलत्वस्यच
धिकदृष्टत्वेनैकावच्छेदेनदृष्टत्वभावात्। वक्तृत्वदृष्यत्वव्यंजकध्यंयत्वंवावयवध्यैकत्वयोरिन्नपरस्परध्य

निवारिथंजकथंथत्वं। एवनीलाबलाकेत्यत्ररूपपरिमाणयोर्द्रव्यनिखातवंशसंख्यापरिमाणयोर्नथ
निवारः। सैवं। वर्णः प्रतिनियतथंजकथंथाः। अत्रयेणसहसमानेंद्रियग्राह्यत्वात्। गंधवदित्यापातत
सत्प्रतिपक्षत्वात्। वस्तुतस्तुनथ्यायिनः प्रत्यभिज्ञानबलेनैवभेदसिद्धेः प्रतिनियतथंजकथंथत्वसाधनथ्ये
वबलवत्वं। ग्राह्यत्वग्राह्यजनकत्वंवाग्राह्यनाशकत्वंवीचीतरंगन्यायेनोत्पत्तिकल्पनमेवाग्राह्यत्वग्राह्यजनकत्वाद
नाशकत्वाच्च। अंत्यावयवत्वमत्वसंख्यापरिमाणेंद्रियग्राह्यत्वादित्यापास्तं। प्रत्यभिज्ञा
विरोधात्। ग्राह्यत्वगत्वादेरभिन्नेऽपि। तस्मात्तद्दोनित्योद्योमेकगुणत्वात्ततत्परिमाणवत्श्रोत्रग्राह्यत्वा

कल्पनेन

तरग्राह्यत्ववत्। विशेषगुणांतरासमानाधिकरणैकद्रव्यगुणत्वात्। समवायपरिमाणवत्। पृथिवीतरनित्यद्रव्य
विशेषगुणत्वात्। अपाकजत्वे नित्यैकभूतसमवेतगुणत्वात्। जलपरमाणुरूपवत्। अथामूर्तद्रव्यनित्वेम
त्यनात्मविशेषगुणत्वात्। कालपरिमाणवत्। विपक्षेबाधकंचप्रत्यभिज्ञानमेवेति। अत्रोच्यते। गकारादिशब्द
योनैकेकाः। अस्मिन्नियुक्तसारिकामनुष्यप्रभवेषुस्त्रीपुंसनविशेषप्रभवेषुचगकारादिषुस्फुटतरयेलक्ष्या
तरस्वरूपतोभेदप्रथा। ऽज्जुक्षीरादिमाधुर्यवत्। नवेयमौपाधिकीभेदप्रतीतिः। नह्यत्रविदितकुंकुमस्यकुंकु
मारुणातरुणीनिवत्स्त्रीपुंसभवत्वमात्रमविकलमुपाधिः। इंद्रियासंनिकर्षेणस्त्रीपुंसादिभेदमविकलोपिग्राह्य

भेदप्रत्ययात्। यतोऽनुमापयति शुक्लो गौरयं शुक्लो गौरयमिति। अथ यथा गौर्याश्रयात्। तत्समवेतज्ञानेभेदप्रत्ययस्तस्माच्च तदनुमानमिति। नच रूपाणां व्यक्तयस्तिरेकानुविधानाभावरूपाणेषु सदृशीर्घत्ववदौपचारिकमौपाधिकत्वं। अथानुविधानाभावात्। अथ व्यञ्जकवायोरेवंविलक्षणेशुक्लादिगकारगतत्वेनभासतेवायोरुपलब्धिसमानेवरूपेणेतिचेत्। नागकारादिगतत्वेबाधकाभावात्। नवा भेदप्रत्यभिज्ञानेदीधकोनहियएवशुक्लशब्दःसएववर्णीशब्दइतिप्रत्यभिज्ञानं। अथयथातेभेदज्ञानाभावेवर्णविशेषानुमानंस्यात्। नवाभिव्यंजकवायोरेवंविलक्षणेशुक्लादिगकारोयमयंगकारइतिनुविगत्वमालंबतेऽतिप्रत्यभिज्ञा भेदप्रथायोपपद्यतेकिंचगत्वादिकंयदिनजातिस्तदाकोलाहलप्रत्ययोनस्यात्। तथाहिनगरादौवर्णाभिर्वर्णानामेकदोच्चारणेहरस्तेनानाभिव्यक्तगकारादिवर्णविभागंकोलाहलमात्रंश्रूयतेनचतत्रवर्णाव्यक्तयश्रुत्यश्रुतिसंभवतिातदभिव्यंजकभेरीताडनादेरभावात्। नववर्णाभिव्यंजकाएवध्वनिर्व्यंजकोऽसन्निधानेपिश्रूयमानवर्णेनसंबंधात्। नववर्णाभिव्यंजकवायुभिरेवध्वनिमात्रमभिव्यज्यतेकव्यंजकत्वंव्यंजकवध्वनिव्यंजनेऽसामर्थ्यात्। तत्समर्थसंस्कारादेरभावा

DR BHAU DAJI

ब्रुनवतत्रशाद्दत्वमेवप्रतीयते.नशाद्दः।यत्तयरेजात्यग्रहा०नवाभिधेजकोवायुरेवकोलाहलत्वेनप्रती
यतेशाद्दत्वेनप्रत्ययाश्र।सन्निधावपितथाप्रत्ययप्रसंगाद्वगकारादियरेतेषांपरस्परंभेदाग्रहान्नकोलाहलधी
रितिचेश्र०न.तेषुवैधर्म्याभावाश्रतदभावेश्रोत्राभावत्याभावाश्र।स्वरूपत्यग्रहणाश्र।समीपेवर्ज्ञगकारेषुभेदा
भावेनतदग्रहेकोलाहलधीप्रसंगाच्च।अनेकवर्णोच्चारणव्यतरेत्वत्वेऽरेपितदप्रतीत्यापत्तेः।तस्मादवश्यंग ३९
त्वाद्विजातिरुपेयायदग्रेगकारादियहेपिकोलाहलस्तुद्वियपदेश्रोत्रग्रहित्यकोपिजातिविशेषःश्रो
त्राह्यःयस्मात्तस्यादिग्देशाविशिष्टशब्दादीनांग्रहेश्रोत्रत्यासामर्थ्यादातन्नत्वतीतिर्न्नत्यादेव०तथापिगत्वादि
नापरापरभावानुपपत्त्यायुकादिगकारेषुनजातिविशेषइतिचेत्।शुककंकारादिशुकत्वादिद्यायजातिर्भिन्न
नयाप्रत्येकंशुककंकारादिषुशुकप्रभवत्वमनुमायतद्व्यवहारः।नशुककंकारादिष्वेकाजातिरस्ति।शुकप्रभवत्वा
नुमापिकातद्व्यवहांरिकावागत्वादिनासंकरप्रसंगाश्र।गत्वेनुनानाअनुगतत्वेननतनोनुगतव्यवहारानु
पपत्तेः।अतएवतारत्वमपिगत्वादिद्यायंनानानुगत्वंतन्निश्चयेपिगत्वसंदेहश्चद्यायतावच्छेदकरूपासश्च
यात्।नचानुगतव्यवहारानुपपत्तिः।सजातीयसाक्षात्कारप्रतिबंधकतावच्छेदकत्वेनानुगतेननानातारत्वेषे

गतव्यवहारसंभवात्। तद्ज्ञानेव्यवहारसिद्धेः। तारत्वमद्वैवनजातीसप्रतियोगित्वादिनिवेत्। न तारत्वतार
तरत्वादयंनत्कर्षरूपाजातिविशेषाएवतेवाश्रयेदृश्यमानेएववृश्यंते। नहुत्कर्षोवध्यपेक्षायथाम करत्वा
दयउत्कर्षव्यवहारमितरस्मापेक्षाःऊर्वंतितथामंदाद्यपेक्षायातारत्वादिव्यवहारं। उत्कर्षस्तुतज्जातिद्व
पादयोसंभावितएव। गंकारेऽनेवंभूतव्यक्तिभेदप्रत्ययबलेनवक्ष्यविशेषानुमानबलेनचतत्सिद्धेर्न
त्वंकत्वंथाप्यतन्नानात्वस्वीकारेतावपिवायुवृत्तित्वेशुक्लादिकंकारगकारादिव्यंजकंवापूर्वोविज्ञातीय
त्वंवाव्यं। तथाचककारव्यंजकवायुत्वव्याप्यरिक्तकवर्णभिव्यंजकवायुत्वंतद्वाशुकगकारव्यंजकवा

योनत्यात्। अथव्यापकंतदासर्वएवकव्यंजकवायवःशुक्लवर्णाभिव्यंजकवायवःस्युःतस्माद्वायुवृत्तित्वे
पितासौतानात्वमावश्यकंअथाऽस्त्रीपुंसादिगकारभेदस्तथापियावद्वैक्यभेदमनेतावन्नित्यावर्णाःप्र
त्यभिज्ञानादितिवेत्यअस्तुत्वादविनाशप्रतीतौसत्यामपिसएवायंगकारइतिप्रत्यभिज्ञाअस्त्रिवतदने
तरमपुत्वादविनाशप्रथानवोत्पादितीत्यनेदप्रत्यभिज्ञयोरन्यतरस्यापरस्परविरुद्धायाश्चाधकस
स्त्रिनवानयोःपरस्परेवाथवावकभावेविनिगमकंयेनैकस्मातिवेनाविशेषःस्यात्। कथंचैनेदाभेद
ज्ञानयोरन्यत्रावधारितंपरस्परप्रतिबंधकत्वंपरित्यज्यप्रथमंतयोरेकत्वेथपरोत्पत्तिप्रमाणप्रतिरोध

८प्रविष्टतयाप्रत्यभिज्ञानंस्याद्नित्यत्वेप्रमाणयितुंनशक्यते।नह्येवमुत्पत्तिवादिनाथनित्यत्वंसिद्धिःक
र्थंस्यात्।उत्पादादिभिर्द्विप्रत्यभिज्ञयोरप्यवश्यंविषयभेदःएकविषयत्वेविरोधेनैकानन्तरमपरोत्पत्ति
प्रसंगात्।एवंचभेदेसामस्त्येनप्रत्यभिज्ञायासजातीयत्वंविषयोनाथक्यभेदःनचेवंतजातीयोभिति
स्यात्।नन्वयमितिवाच्यं।तजातीयत्वप्रतीतेरपिसोयमित्याकारदर्शनात्।यथासैवेयंगाथातद्वे ४१
वैसोषधंवजभिःश्लोकंमयापिप्रत्यहंक्रियमानमस्तीत्यादौ।नहितावद्वर्णमात्रमात्रपूर्वीजरराजनदी
दीनादिभुतन्नानात्वाद्वाकिंतुतदुच्चारणानंतरमुच्चारणं।तज्ञानानंतरंज्ञानंवातच्चनानेतितद्वतीगाथा
८२

पिनानैव·नवाभेदेसामस्त्येनउत्पादादिकुरेवाथद्योत्पादादिकमवगाहते।गकारगतत्वप्रतीतेर्भीतत्व·प
संगात्।नचेष्टापत्तिरभेदेसामस्त्येनतद्विरुद्धधर्म्मत्वप्रसाक्तदयात्।विनगमकाभावेनोभयथापियथार्थी
त्वात्।क्वांतर्हितत्वाभेदोविषयःयत्रप्रथमंनभेदप्रथा।अतएवभेदसत्वेतद्ज्ञानाग्रक्वचित्साधोतातस्मा
द्यत्रभेदप्रतीतिस्तद्हितरवाधकावाद्यातत्रप्रत्यभिज्ञैवनभवतिभवंतीवातज्जातीयत्वमालंबते।नन्वधोता
विद्योघदर्शनेसमानोदयात्।अपिचव्यथाशंखादिध्वनीनामुत्पत्तिविनाशप्रत्ययानारवादिविरुद्धर्म्म
संसर्गाच्चानित्यत्वेसेवेयंगर्ज्जरीत्यादिप्रत्यभिज्ञातजातीयत्वविषया।तथावर्णप्रत्यभिज्ञापि।अथथा

ध्वनयोऽपि नित्याः स्युः उत्पत्तिविनाशातारत्वादिप्रतीतीनां प्रत्यभिज्ञावलेनैवाधिकत्वात् । नच वर्णेषु तारत्वेनैव
भासमानाध्वनयः उपाधयः संभवंति । न हि ध्वनिषु वर्णेषु स्वज्ञानकर्तृत्वाद्यभिधातानावादितिवाच्यं । वर्णेष्वार
ब्धायामपि पूर्वोत्पन्नोत्पत्त्यादिजनकतानामसंभवात् । तस्मादुत्पत्तिविनाशातारत्वादिप्रत्ययस्य प्रत्यभिज्ञानस्य च तु ४२
ल्यविषयत्वेऽपि नित्यत्वमनित्यत्वं वा नयोरपि नित्यत्वमेवेति । उक्तन्यायेन प्रत्यभिज्ञायाः सजातीयत्व
विषयत्वात् । किंचयदि ध्वनयः श्रोतृभिः व्याप्तदेशावस्थालोकानामेव वेद्यत्वेन कथंचनकानामविशेषेण उपलंभात् । न
संशयः स्यात् । न हि वैदानीं श्रोतारोनास्तीति निश्चयः । तस्माद्वर्णेन नित्येनैवा सर्वेण सत्प्रत्यभिज्ञत्वात् । अस्मदा

उनित्येन

दिवहिरिंद्रियग्राह्यत्वमनिज्ञातिसत्वात् । अस्मदादिप्रत्यक्षगुणत्वेऽपि । आत्मैकत्वप्रत्यक्षत्वपक्षे विशेषगुण
त्वात् । सर्वैकसमवेतप्रत्यक्षविशेषगुणत्वाद्वा । अस्मदादिप्रत्यक्षगुणत्वात् । अस्मदादिप्रत्यक्षत्वाच्च । ईश्वरज्ञानेन
तथा तत्संयोजककारणाभावाच्च । बहिरिंद्रियग्राह्यत्वेऽपि हेतुगुणत्वात् । भूतप्रत्यक्षगुणत्वात् । उत्कर्षापकर्षाभ्यां नि प्रतिज्ञा
मित्तज्ञातिसत्वादित्यादिरसत्वादिव्याप्यजातेर्नानात्वेपि नैकश्रोत्रग्राह्यत्वनिमित्तत्वस्य साधारणत्वात् ।
नवानसाधनावच्छिन्नस्यपक्षधर्मावच्छिन्नस्यवा साध्यव्यापकः । स्पर्शवत्समवेतत्वमुपाधिः सर्वत्रवर्णात्म
कशब्दपक्षीकरणेऽयोगगुणेषुअनित्येषुसाध्याव्यापकत्वात् । स्पर्शवत्पदव्यापकमात्रव्यावर्तकत्वेनप

उनित्यु

ज्ञेतरत्वाच्चेतिपदावर्णोऽवनित्यः तदाकैवकथापुरुषविवक्षाधीनानुपूर्व्यादिविशिष्टवर्णसमूहरू
पाणांपाठानांकृतसङ्केतसमूहरूपवाक्यव्यक्तेः समांवतत्समूहस्यवेदस्येति। तथापिपरतंत्रपुरुषपरं
परायत्तयाघवाद्याविच्छेदमेवनित्यतांकूटमञ्जतिवेत्र। नास्मृत्यावाराजुमितानोज्ञाखाना मुच्छेदर्शनात्र
स्मादेतत्। विवादपदमपूर्ववोधिकास्मृतिः। सत्यर्थोऽभवज्जनकवेदमूलाऽविगीतमहाजनपरिग्रहो
तस्मृतित्वात्पत्यक्षवेदमूलस्मृतिवत्। वेदमूलत्वंवेदज्ञत्वाद्वभवज्जन्यत्वाद्वाज्ञानद्वारावज्ञायमानस्यवेदस्य
स्मृतिहेतुतयाऽनुमानंकल्पितस्यवज्ञानादिप्रयवहितस्यपटेनतुकर्करणकारणता। वेदेसत्येवतत्स्मृतिसंभवा नात्र

स्मृतिप्रणयनाद्यकेदार्थस्मृतितएवोपस्थितःनवस्मृत्यर्थबोधकवेदानुमानिस्मृत्यर्थरूपवेदार्थस्यविषयत्वा
द्वेदोऽनुवादकःज्ञानांतरोपनीतस्यविशेषणत्वेनविशिष्टबुद्धिसंभवाच्च। पाकक्रतौमानसप्रत्यक्षायोपाकस्य
संज्ञासंज्ञिज्ञानेसंज्ञायाज्ञानस्यायथार्थत्वेतद्वयवसायेभ्रमविषयत्वेवश्यथाभ्रांतिभ्रांतिज्ञसंकरापत्तिः
नवज्ञाद्वयोर्थोऽनुमानस्यविषयः। तस्यासिद्धत्वेनाजनकतयास्मृत्याकत्वात्। सचवेदोनित्यत्वेऽनुमेयएवश्रु
तिमतादेवार्थसंबंधार्थस्मृतिप्रणयनसंभवात्। नत्वासंसारमपठितस्यनवेदत्वंऽप्यपौरुषेयोऽभिव्यक्तिमात्रो
निश्वासवदभिप्रायतोवाऽनुपूर्वीहीनवर्णमात्रस्यनिरर्थकत्वात्। ज्ञानजनकसमभिव्याहारस्यानेकत्वेविशे

DR BHAU DAJI LAD MUSEUM

४४

षानुमानाद्वेतिचेन्न॰स्मृत्यर्थज्ञापकत्वेनैवज्ञातस्यवेदस्यस्मृत्यर्थानुभावकत्वात्।नहिगाङ्खो धेनिय
पदानुपूर्वीहेतुःअभिचारात्।पदस्यविशेषानुपूर्वीनियमेपितन्नदृष्टेनुपूर्वीकपदविशेषत्वेननहेतुत्व॰
सकरादिपदानांप्रत्येकंयभिचारात्किंवयभिचारितदर्थज्ञापकत्वेनज्ञातस्यलाघवात्कल्पकत्वात्।तद्द
ज्ञापकत्वज्ञानार्थमेवक्रविदृष्टैकमक्षरविशेषाणामुपयोगः।अतएवर्णलोपादेरुज्ञानमेतिसकारमंदृ
लिपाडुच्चारणेवाहसकरमंदेहेपिवाक्यार्थबोधः।नचैकमिकपदत्वंवाक्यत्वं॰नवाचपदक्रमः।अनुच्चार्यमा
णतयोच्चारणधीनत्वमुगपदनुभीयमानतयाडुच्चधीनत्ववातस्यानावादितिचेत्।नानहिक्रमिकपदत्व

त्ववाक्यत्वंगोरश्वइत्यादावभावात्।किंतुविशिष्टार्थपरत्वादेवतद्वाक्यमेवंअथानुच्चार्यमानस्यनवाक्य
त्वं।नवार्थानुभविकत्वमितिचेन्न।लिप्यनुसितानामपिवाक्यत्वादर्थबोधत्वं॰लिपिस्तुव्यावस्मृतिःकिंच
वाक्यमुच्चार्यतेनतूच्चारणंवाक्यत्वंअथथावाक्यमुच्चार्येदित्यत्रानन्वयापत्तिरनुच्चरितमौनिश्चो
कश्चवाक्यंनस्याद्।उच्चारणादर्शायांवाक्यत्वेववाक्यस्यासत्वमेवस्याद्।एकदातावत्पदानामुच्चारणा
भावात्।नचक्रतक्रियमाणैकस्थमाणोच्चारणस्यवाक्यत्वंसमुदायेप्रत्येकस्याभावात्।तस्मादर्थवि
शेषज्ञापकत्वेनैवज्ञातादर्थविशेषधीःअतएवास्त्रिवक्रिलिंगमितिशास्त्रात्यतीतेहमेवक्रेरनुमानं॰नन्

तदर्थज्ञानसकत्वेनज्ञाताप्रदार्थज्ञानं प्रामाण्यान्नतुसमर्गधीः घटं कर्मत्वमानयनेभावनातद्बोधक
मितिज्ञानेपिघटमानयेतिवाक्यादिवान्वयबोधाभावात्। एवंवान्वयप्रकारकर्मत्वाद्युपस्थापक
विभक्त्यादिमद्पदविशेष्यतयोत्पादितकांक्षाद्दश्यज्ञानवाक्यार्थधीहेतुरतोनतेविनाज्ञापकत्व ४५
प्रामाण्येणज्ञानाद्दर्थधीः।हस्तकरादिमद्देहेक्षणज्ञानमानयेत्याद्दीव विभक्त्यादिज्ञानाद्दिवाक्यार्थानुभव
तिभेवानहितन्न विभक्त्यादिमद्वृत्तिज्ञानमनुमानाद्दकिंतुघटःकर्मत्वमित्याद्यन्वयविशेषितपदाज
न्योपस्थितिसत्त्वात्सावेद्दाप्यस्ति०वक्तातत्कथनानाप्तत्वात्पदार्थोपस्थित्यनंतरंवाक्यार्थबोधेतथैवता

पदविशेषत्वेनवाक्यार्थत्वाद्दे२

मयीअनुमितिवेदाद्यवाक्यार्थानुभवेविलक्षणेवमाप्तत्वार्थंयापकत्वेनेवज्ञातस्यस्मृत्यर्थानुभावक
त्वाद्यधर्म्मिग्राद्दकप्रमाणेनतथैवतस्यसिद्धत्वात्।तवेश्वरस्येवाज्ञानीश्वरस्यकद्दत्वे।अतएववर्णपद्वि
भक्त्यादिविशेषघटितत्वेनाज्ञातस्यावेद्यस्यावेद्यस्यवावाक्यार्थानुभावकत्वात्।पदार्थस्थानीयस्य
स्यवाक्यार्थःतत्रवर्णसमूहःपदंपदसमूहोवाक्यमित्यत्रापिननोग्रहः।प्रमाणग्रहत्वमात्रेणतस्य
सिद्धेः।अन्यथाह्यस्मद्दादेस्तत्त्वविनानसोनुभावकइत्याद्दीतदसिद्धावाश्रयासिद्धिः सिद्धावाधः।तेनकिंच
मदीनुपपत्तिमभिद्दयतत्रानुभावकत्वस्यधर्म्मिग्राद्दकमानसिद्धत्वात्अतएवस्मृतिर्निर्द्दाय्याकल्पित

विधिनिषेधकवेदार्थमवगम्य प्रवृत्तिनिवृत्ती। अथ यथा विधिनिषेधकानां नानाप्रकारकत्वेन विम
र्क्यादिविरोधेऽपि वस्तुतस्तदर्थानुमानमशक्यत्वान्नतोऽर्थधीः स्यात्। तथा पि वस्तुज्ञानानुमानानंतर
मिवानुमितानुमानादेव वाक्यार्थसिद्धेर्नैयायिकवाक्यवद्भेदस्यानुवादकत्वस्याप्रतिषेधात्। धर्मि
ग्राहकमानेनस्मृत्यर्थज्ञापकतया ज्ञानात्मेष्टसामग्रीकत्वेनानुपदमेवोक्तार्थबोधोदयाच्च। अ
पेक्षणीयांतराभावाच्च। अनुमानस्यथास्यादिज्ञानापेक्षितत्वेन विलंबितत्वाच्चानवद्यत्वेप्यपियो ग्य
तादिज्ञानापेक्षितया विलंबः तन्निरपेक्षबोधकत्वेधर्मिग्राहकमानसिद्धत्वाच्च। योऽयतोविशिष्ट

त्वेवानुमानाच्च। एवंमंगलाचारत्वादिगीतशिष्टाचारत्वेनकर्तव्यतामनुमायमाकर्तव्यतावेदबोधितालो
किकाविगीतशिष्टाचारकर्तव्यतात्वादितिनबोधकत्वेनानुमितवेदात्कर्तव्यताधीः ततःप्रवृत्तिः। अनुमा
चारेवेदबोधितकर्तव्यताकःतादृशाचारत्वादित्यनुमितवेदात्कर्तव्यताधीः विनक्र्यादिकंविनानु
मितवेदान्नकर्तव्यताज्ञानाभावात्। मन्त्रज्ञानाचेदित्येवंरूपव्यतिरेकानुमानंतथाव्याप्त्यभावात्। तस्मा
न्नित्यकर्तव्यतामनुमायतबोधकवेदानुमानेप्रथमंकर्तव्यताज्ञानेपिवेदानुमानमविनाभावान्न
चततएवघटत्वज्ञवेदानुमानेघटत्वज्ञत्वेऽन्वयेपनैरपेक्षाच्चखरा। यत्तुअष्टकाःकर्तव्याःकार्यत्वाच्चअष्टकाद

त्येवंरूपमेववाक्यमनुमेयमुपस्थितत्वात्। एवंरूपतत्रैवार्थेऽभिरूपमथार्थवेदानुमानेनदोषायाए
कार्थानेकपदोपस्थितौवानेकवाक्यानुमानमेवेति। तन्न। आचारतोवेदानुमानेमंगलमाचरेदित्याद्यर्थ
न्नरोपस्थितौनियमाभावात्। अनेकवेदकल्पनेवाऽनुभवविरोधःस्मृतिमूलंवानेकंवाक्यंनादरूपक ४७ ४७
मितिकथमाऽनुमेनेकमनुमित्याऽनवस्थत्यर्थबोधकोवेदःस्मृतिस्तदृशाएवानुमेयःनियमतःस्मृ
तेरुपस्थितत्वादितिवाच्यं। तदर्थस्मृतेरपिनानाप्रकारकत्वात्। तस्यचप्रदीपादावुच्चरितस्यैववेदत्वं
चयहणार्हतयाचराद्दष्टत्ववाक्यत्वमर्थबोधकत्वादित्येतदेवयुक्तंस्मृत्याचारेणानुमितोवेदोऽर्थबोध

यतीतिपूर्वपूर्वेणानुमितवेदाऽन्तरेणस्मृत्याचारावितिनांधापरंपराशद्दशक्तिग्रहवदनुभवतेनप्रमाण
मूलकत्वात्। तर्ह्यनित्यानुमेयत्ववेदस्यनदृष्टेदृष्टिः। अत्रोच्यते॥ उच्चिन्नवेदादर्थीत्यस्मृत्याचार्यो
नुपपन्नेनेक्षामन्यत्रकल्पनेऽतएवनाप्तप्रामाण्यसिद्धिर्वाबाधस्मृत्याचारानुमितस्यवेदस्यासम्भि
षणाप्तप्रामाण्यदानोवस्मृतेरर्थस्मृतीत्याचारावकर्तृस्मृतामनुमायप्रदृत्तिःनचैवंकिंचेदेनेतिवाच्यं। उक्त्य
त्वात्। अविनाभावाच्चतत्कल्पनेतुल्यं। तथाचस्मृत्याचारयोर्वेदन्यायानुभवमूलत्वानुमानादेवप्रत्ति
धर्म्मताबलात्तस्यवेदमूलत्वसिद्धिः। अन्यथातस्यानुभावकत्वाभावेनमूलत्वानुपपत्तेः। तस्मात्स्मृ

त्यावारा उभितोवदःप्रत्यक्षोध्ययनविषयश्चवेदत्वात्मतवत्।अन्यथासामर्थ्यंतरकल्पनेगौरवप्रसं
गः।ननुस्मृतिनिंदार्थवादेनकलितोविधिनिषेधकवाक्यंकथमर्थमवगच्छप्रष्टव्ये निष्टङ्कीनश्चित्र
वर्णपदविभक्तिविधिप्रत्ययक्रमविशेषणामनुमानंभवति।यत्रिवागदितिचेत्।नास्मृतिर्निंदावा ४८ ४८
क्याथांप्रष्टव्येपरार्थाहेत्वर्थ एवकल्प्यतेलाघवात्।ननुविधायकनिषेधकवाक्यंगौरवाऽऽक्ष
होषाच्चायत्रचार्थवादावेवतदर्थीवगमस्मरंतिष्टत्वमित्याहोतत्रनतत्कल्पनापि।अथतस्याध्य
यनविषयत्वेशाखांतरवद्वर्जभिर्मेधाविभिराध्यात्मिकशक्ति मद्यन्नेर्ह्रियमाणशाखायाउच्छे

दासंभवइतिचेन्न।एकाध्ययनसकलशाखाध्ययनशक्तिरित्येकेनेवापेरपितदनध्ययनेशाखोच्छेद
संगात्।एकानधीतायाश्चपरंध्ययनविषयत्वेमानाभावाच्छाखात्वेवप्रत्यक्षशाखात्वेप्रयो
जकत्वाच्चयद्यपिमद्यन्नशाखवेदविदोध्यासाद्यःसंत्येवतथापध्ययनाभावएवेदानींशाखोच्छेदोन
वशाखोच्छेदेवर्णपदस्मृतिनिरंकयाप्रत्यक्षवेदादपिवाक्यार्थप्रयोगयोरनिश्चयेवैदिकव्यवहारमा
त्रलुप्तेतिचेन्न।श्रूयमाणवाक्यस्यैवमहाजनपरिग्रहीतत्वान्नमात्रबोधितेतिकर्तव्यतयेवशिष्टे
रनुष्ठीयमानत्वाच्चतदर्थनिश्चयात्तनबोधितशाखाबोधिकर्तव्यताशंकयैकस्मिन्नपिकर्मण्यनाश्वा

मप्रमाणः नानाशाखेतिकर्त्तव्यतापूरणीयत्वान्नत्येतिसांप्रतं। संतिहितत्तत्कर्मणिनानाशाखावोधि
